# Raghuvansha by Kalidas Chapter 7

# રઘુવંશં સર્ગઃ ૭ કાલિદાસકૃતમ્

## Document Information

Text title : raghuvansha7

File name : raghuvansha7.itx

Category : major_works, kAlidAsa

Location : doc_z_misc_major_works

Author : kalidasa

Transliterated by : Arvind Kolhatkar akolhatkar at rogers.com

Proofread by : Arvind Kolhatkar akolhatkar at rogers.com

Latest update : April 14, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# રઘુવંશં સર્ગઃ ૭ કાલિદાસકૃતમ્

અથોપયન્ત્રા સદૃશેણ યુક્તાં સ્કન્દેન સાક્ષાદિવ દેવસેનામ્ ।
સ્વસારમાદાય વિદર્ભનાથઃ પુરપ્રવેશાભિમુખો બભૂવ ॥ ૭-૧॥

સેનાનિવેશાન્પૃથિવીક્ષિતોઽપિ જગ્મુર્વિભાતગ્રહમન્દભાસઃ ।
ભોજ્યાં પ્રતિ વ્યર્થમનોરથત્વાદ્રૂપેષુ વેશેષુ ચ સાભ્યસૂયા ॥ ૭-૨॥

સાંનિધ્યયોગાત્કિલ તત્ર શચ્યાઃ સ્વયંવરક્ષોભકૃતામભાવઃ ।
કાકુત્સ્થમુદ્દિશ્ય સમત્સરોઽપિ શશામ તેન ક્ષિતિપાલલોકઃ ॥ ૭-૩॥

તાવત્પ્રકીર્ણાભિનવોપચારમિન્દ્રાયુધદ્યોતિતતોરણાઙ્કમ્ ।
વરઃ સવધ્વા સહ રાજમાર્ગં પ્રાપ ધ્વજચ્છાયનિવારિતોષ્ણમ્ ॥ ૭-૪॥

તતસ્તદાલોકનતત્પરાણાં સૌધેષુ ચામીકરજાલવત્સુ ।
બભૂવુરિત્થં પુરસુન્દરીણાં ત્યક્તાન્યકાર્યાણિ વિચેષ્ટિતાનિ ॥ ૭-૫॥

આલોકમાર્ગં સહસા વ્રજન્ત્યા કયાચિદુદ્વેષ્ટનવાન્તમાલ્યઃ ।
બદ્ધું ન સંભાવિત એવ તાવત્કરેણ રુદ્ધોઽપિ ચ કેશપાશઃ ॥ ૭-૬॥

પ્રસાધિકાલમ્બિતમગ્રપાદમાક્ષિપ્ય કાચિદ્દ્રવરાગમેવ ।
ઉત્સૃષ્ટલીલાગતિરાગવાક્ષાદલક્તકાઙ્કાં પદવીં તતાન ॥ ૭-૭॥

વિલોચનં દક્ષિણમઞ્જનેન સંભાવ્ય તદ્વઞ્ચિતવામનેત્રા।
તથૈવ વાતાયનસંનિકર્ષં યયૌ શલાકામપરા વહન્તી ॥ ૭-૮॥

જાલાન્તરપ્રેષિતદૃષ્ટિરન્યા પ્રસ્થાનભિન્નાં ન બબન્ધ નીવીમ્ ।
નાભિપ્રવિષ્ટાભરણપ્રભેન હસ્તેન તસ્થાવવલમ્બ્ય વાસઃ ॥ ૭-૯॥

અર્ધાઞ્ચિતા સત્વરમુત્થિતાયાઃ પદે પદે દુર્નિમિતે ગલન્તી ।
કસ્યાશ્ચિદાસીદ્રશના તદાનીમઙ્ગુષ્ઠમૂલાર્પિતસૂત્રશેષા ॥ ૭-૧૦॥

તાસાં મુખૈરાસવગન્ધગર્ભૈર્વ્યાપ્તાન્તરાઃ સાન્દ્રકુતૂહલાનામ્ ।
વિલોલનેત્રભ્રમરૈર્ગવાક્ષાઃ સહસ્રપત્રાભરણા ઇવાસન્ ॥ ૭-૧૧॥

તા રાઘવં દૃષ્ટિભિરાપિબન્ત્યો નાર્યો ન જગ્મુર્વિષયાન્તરાણિ ।
તથા હિ શેષેન્દ્રિયવૃત્તિરાસાં સર્વાત્મના ચક્ષુરિવ પ્રવિષ્ટા ॥ ૭-૧૨॥

સ્થાને વૃતા ભૂપતિભિઃ પરોક્ષૈઃ સ્વયંવરં સાધુમમંસ્ત ભોજ્યા ।
પદ્મેવ નારાયણમન્યથાસૌ લભેત કાન્તં કથમાત્મતુલ્યમ્ ॥ ૭-૧૩॥

પરસ્પરેણ સ્પૃહણીયશોભં ન ચેદિદં દ્વન્દ્વમયોજયિષ્યત્ ।
અસ્મિન્દ્વયે રૂપવિધાનયત્નઃ પત્યુઃ પ્રજાનાં વિતથોઽભવિષ્યત્ ॥ ૭-૧૪॥

રતિસ્મરૌ નૂનમિમાવભૂતાં રાજ્ઞાં સહસ્રેષુ તથા હિ બાલા ।
ગતેયમાત્મપ્રતિરૂપમેવ મનો હિ જન્માન્તરસંગતિજ્ઞમ્ ॥ ૭-૧૫॥

ઇત્યુદ્ગતાઃ પૌરવધૂમુખેભ્યઃ શ઼ૃણ્વન્કથાઃ શ્રોત્રસુખાઃ કુમારઃ ।
ઉદ્ભાસિતં મઙ્ગલસંવિધાભિઃ સંબન્ધિનઃ સદ્મ સમાસસાદ ॥ ૭-૧૬॥

તતોઽવતીર્યાશુ કરેણુકાયાઃ સ કામરૂપેશ્વરદત્તહસ્તઃ ।
વૈદર્ભનિર્દિષ્ટમથો વિવેશ નારીમનાંસીવ ચતુષ્કમન્તઃ ॥ ૭-૧૭॥

મહાર્હસિંહાસનસંસ્થિતોઽસૌ સરત્નમર્ઘ્યં મધુપર્કમિશ્રમ્ ।
ભોજોપનીતં ચ દુકૂલયુગ્મં જગ્રાહ સાર્ધં વનિતાકટાક્ષૈઃ ॥ ૭-૧૮॥

દુકૂલવાસાઃ સ વધૂસમીપં નિન્યે વિનીતૈરવરોધરક્ષૈઃ ।
વેલાસકાશં સ્ફુટફેનરાશિર્નવૈરુદન્વાનિવ ચન્દ્રપાદૈઃ ॥ ૭-૧૯॥

તત્રાર્ચિતો ભોજપતેઃ પુરોધા હુત્વાગ્નિમાજ્યાદિભિરગ્નિકલ્પઃ ।
તમેવ ચાધાય વિવાહસાક્ષ્યે વધૂવરૌ સંગમયાંચકાર ॥ ૭-૨૦॥

હસ્તેન હસ્તં પરિગૃહ્ય વધ્વાઃ સ રાજસૂનુઃ સુતરાં ચકાસે ।
અનન્તરાશોકલતાપ્રવાલં પ્રાપ્યેવ ચૂતઃ પ્રતિપલ્લવેન ॥ ૭-૨૧॥

આસીદ્વરઃ કણ્ટકિતપ્રકોષ્ઠઃ સ્વિન્નાઙ્ગુલિઃ સંવવૃતે કુમારી ।
તસ્મિન્દ્વયે તત્ક્ષણમાત્મવૃત્તિઃ સમં વિભક્તેવ મનોભવેન ॥ ૭-૨૨॥

તયોરપાઙ્ગપ્રતિસારિતાનિ ક્રિયાસમાપત્તિનિવર્તિતાનિ ।
હ્રીયન્ત્રણામાનશિરે મનોજ્ઞામન્યોન્યલોલાનિ વિલોચનાનિ ॥ ૭-૨૩॥

પ્રદક્ષિણપ્રક્રમણાત્કૃશાનોરુદર્ચિષસ્તન્મિથુનં ચકાસે ।
મેરોરુપાન્તેષ્વિવ વર્તમાનમન્યોન્યસંસક્તમહસ્ત્રિયામમ્ ॥ ૭-૨૪॥

નિતમ્બગુર્વી ગુરુણા પ્રયુક્તા વધૂર્વિધાતૃપ્રતિમેન તેન ।
ચકાર સા મત્તચકોરનેત્રા લજ્જાવતી લાજવિસર્ગમગ્નૌ ॥ ૭-૨૫॥

હવિઃશમીપલ્લવલાજગન્ધી પુણ્યઃ કૃશાનોરુદિયાય ધૂમઃ ।
કપોલસંસર્પિશિખઃ સ તસ્યા મુહૂર્તકર્ણોત્પલતાં પ્રપેદે ॥ ૭-૨૬॥

તદઞ્જનક્લેદસમાકુલાક્ષં પ્રમ્લાનબીજાઙ્કુરકર્ણપૂરમ્ ।
વધૂમુખં પાટલગન્ધલેખમાચારધૂમગ્રહણાદ્બભૂવ ॥ ૭-૨૭॥

તૌ સ્નાતકૈર્બન્ધુમતા ચ રાજ્ઞા પુરંધ્રિભિશ્ચ ક્રમશઃ પ્રયુક્તમ્ ।
કન્યાકુમારૌ કનકાસનસ્થાવાર્દ્રાક્ષતારોપણમન્વભૂતામ્ ॥ ૭-૨૮॥

ઇતિ સ્વસુર્ભોજકુલપ્રદીપઃ સંપાદ્ય પાણિગ્રહણં સ રાજા ।
મહીપતીનાં પૃથગર્હણાર્થં સમાદિદેશાધિકૃતાનધિશ્રીઃ ॥ ૭-૨૯॥

લિઙ્ગૈર્મુદઃ સંવૃતવિક્રિયાસ્તે હ્રદાઃ પ્રસન્ના ઇવ ગૂઢનક્રાઃ ।
વૈદર્ભમામન્ત્ર્ય યયુસ્તદીયાં પ્રત્યર્પ્ય પૂજામુપદાછલેન ॥ ૭-૩૦॥

સ રાજલોકઃ કૃતપૂર્વસંવિદારમ્ભસિદ્ધૌ સમયોપલભ્યમ્ ।
આદાસ્યમાનઃ પ્રમદામિષં તદાવૃત્ય પન્થાનમજસ્ય તસ્થૌ ॥ ૭-૩૧॥

ભર્તાપિ તાવત્ક્રથકૈશિકાનામનુષ્ઠિતાનન્તરજાવિવાહઃ ।
સત્ત્વાનુરૂપાહરણીકૃતશ્રીઃ પ્રાસ્થાપયદ્રાઘવમન્વગાચ્ચ ॥ ૭-૩૨॥

તિસ્રસ્ત્રિલોકપ્રથિતેન સાર્ધમજેન માર્ગે વસતીરુષિત્વા ।
તસ્માદપાવર્તત કુણ્ડિનેશઃ પર્વાત્યયે સોમ ઇવોષ્ણરશ્મેઃ ॥ ૭-૩૩॥

પ્રમન્યવઃ પ્રાગપિ કોસલેન્દ્રે પ્રત્યેકમાત્તસ્વતયા બભૂવુઃ ।
અતો નૃપશ્ચક્ષમિરે સમેતાઃ સ્ત્રીરત્નલાભં ન તદાજત્મસ્ય ॥ ૭-૩૪॥

તમુદ્વહન્તં પથિ ભોજકન્યાં રુરોધ રાજન્યગણ સ દૃપ્તઃ ।
બલિપ્રદિષ્ટાં શ્રિયમાદદાનં ત્રૈવિક્રમં પાદમિવેન્દ્રશત્રુઃ ॥ ૭-૩૫॥

તસ્યાઃ સ રક્ષાર્થમનલ્પયોધમાદિશ્ય પિત્ર્યં સચિવં કુમારઃ ।
પ્રત્યગ્રહીત્પાર્થિવવાહિનીં તાં ભાગીરથીં શોણ ઇવોત્તરઙ્ગઃ ॥ ૭-૩૬॥

પત્તિઃ પદાતિં રથિનં રથેશસ્તુરંગસાદી તુરગાધિરૂઢમ્ ।
યન્તા ગજસ્યાભ્યપતદ્ગજસ્થં તુલ્યપ્રતિદ્વન્દ્વિ બભૂવ યુદ્ધમ્ ॥ ૭-૩૭॥

નદત્સુ તૂર્યેષ્વવિભાવ્યવાચો નોદીરયન્તિ સ્મ કુલોપદેશાન્ ।
બાણાક્ષરૈરેવ પરસ્પરસ્ય નામોર્જિતં ચાપભૃતઃ શશંસુઃ ॥ ૭-૩૮॥

ઉત્થાપિતઃ સંયતિ રેણુરશ્વૈઃ સાન્દ્રીકૃતઃ સ્યન્દનવંશચક્રૈઃ ।

વિસ્તારિતઃ કુઞ્જરકર્ણતાલૈર્નેત્રક્રમેણોપરુરોધ સૂર્યમ્ ॥ ૭-૩૯॥

મત્સ્યધ્વજા વાયુવશાદ્વિદીર્ણૈર્મુખૈઃ પ્રવૃદ્ધધ્વજિનીરજાંસિ ।
બભુઃ પિબન્તઃ પરમાર્થમત્સ્યાઃ પર્યાવિલાનીવ નવોદકાનિ ॥ ૭-૪૦॥

રથો રથાઙ્ગધ્વનિના વિજજ્ઞે વિલોલઘણ્ટાક્વણિતેન નાગઃ ।
સ્વભર્તુનામગ્રહણાદ્બભૂવ સાન્દ્રે રજસ્યાત્મપરાવબોધઃ ॥ ૭-૪૧॥

આવૃણ્વતો લોચનમાર્ગમાજૌ રજોન્ધકારસ્ય વિજૃમ્ભિતસ્ય ।
શસ્ત્રક્ષતાશ્વદ્વીપવીરજન્મા બાલારુણોઽભૂદ્રુધિરપ્રવાહઃ ॥ ૭-૪૨॥

સ ચ્છિન્નમૂલઃ ક્ષતજેન રેણુસ્તસ્યોપરિષ્ટાત્પવનાપધૂતઃ ।
અઙ્ગારશેષસ્ય હુતાશનસ્ય પૂર્વોત્થિતો ધૂમ ઇવાબભાસે ॥ ૭-૪૩॥

પ્રહારમૂર્ચ્છાપગમે રથસ્થા યન્તૄનુપાલભ્ય નિવર્તિતાશ્વાન્ ।
યૈઃ સાદિતા લક્ષિતપૂર્વકેતૂંસ્તાનેવ સામર્ષતયા નિજઘ્નુઃ ॥ ૭-૪૪॥

અપ્યર્ધમાર્ગે પરબાણલૂના ધનુર્ભૃતાં હસ્તવતાં પૃષત્કાઃ ।
સંપ્રાપુરેવાત્મજવાનુવૃત્ત્યા પૂર્વાર્ધભાગૈઃ ફલિભિઃ શરવ્યમ્ ॥ ૭-૪૫॥

આધોરણાનાં ગજસંનિપાતે શિરાંસિ ચક્રૈર્નિશિતૈઃ ક્ષુરાગ્રૈઃ ।
હતાન્યપિ શ્યેનનખાગ્રકોટિવ્યાસક્તકેશાનિ ચિરેણ પેતુઃ ॥ ૭-૪૬॥

પૂર્વં પ્રહર્તા ન જઘાન ભૂયઃ પ્રતિપ્રહારાક્ષમમશ્વસાદી ।
તુરંગમસ્કન્ધનિષણ્ણદેહં પ્રત્યાશ્વસન્તં રિપુમાચકાઙ્ક્ષ ॥ ૭-૪૭॥

તનુત્યજાં વર્મભૃતાં વિકોશૈર્બૃહત્સુ દન્તેષ્વસિભિઃ પતદ્ભિઃ ।
ઉદ્યન્તમગ્નિં શમયાંબભૂવુર્ગજા વિવિગ્નાઃ કરશીકરેણ ॥ ૭-૪૮॥

શિલીમુખોત્કૃત્તશિરઃફલાઢ્યા ચ્યુતૈઃ શિરસ્ત્રૈશ્ચષકોત્તરેવ ।
રણક્ષિતિઃ શોણિતમદ્યકુલ્યા રરાજ મૃત્યોરિવ પાનભૂમિઃ ॥ ૭-૪૯॥

ઉપાન્તયોર્નિષ્કુષિતં વિહંગૈરાક્ષિપ્ય તેભ્યઃ પિશિતપ્રિયાપિ ।
કેયૂરકોટિક્ષતતાલુદેશા શિવા ભુજચ્છેદમપાચકાર ॥ ૭-૫૦॥

કશ્ચિદ્દ્વિષત્ખડ્ગહૃતોત્તમાઙ્ગઃ સદ્યો વિમાનપ્રભુતામુપેત્ય ।
વામાઙ્ગસંસક્તસુરાઙ્ગનઃ સ્વં નૃત્યત્કબન્ધં સમરે દદર્શ ॥ ૭-૫૧॥

અન્યોન્યસૂતોન્મથનાદભૂતાં તાવેવ સૂતૌ રથિનૌ ચ કૌચિત્ ।
વ્યશ્વૌ ગદાવ્યાયતસંપ્રહારૌ ભગ્નાયુધૌ બાહુવિમર્દનિષ્ઠૌ ॥ ૭-૫૨॥

પરસ્પરેણ ક્ષતયોઃ પ્રહર્ત્રોરુત્ક્રાન્તવાય્વોઃ સમકાલમેવ ।
અમર્ત્યભાવેऽપિ કયોશ્ચિદાસીદેકાપ્સરઃપ્રાર્થિતયોર્વિવાદઃ ॥ ૭-૫૩॥

વ્યૂહાવુભૌ તાવિતરેતરસ્માદ્ભઙ્ગં જયં ચાપતુરવ્યવસ્થમ્ ।
પશ્ચાત્પુરોમારુતયોઃ પ્રવૃદ્ધૌ પર્યાયવૃત્યેવ મહાર્ણવોર્મી ॥ ૭-૫૪॥

પરેણ ભગ્નેऽપિ બલે મહૌજા યયાવજઃ પ્રત્યરિસૈન્યમેવ ।
ધૂમો નિવર્ત્યેત સમીરણેન યતસ્તુ કક્ષસ્તત એવ વહ્નિઃ ॥ ૭-૫૫॥

રથી નિષઙ્ગી કવચી ધનુષ્માન્દૃપ્તઃ સ રાજન્યકમેકવીરઃ ।
નિવારયામાસ મહાવરાહઃ કલ્પક્ષયોદ્વૃત્તમિવાર્ણવામ્ભઃ ॥ ૭-૫૬॥

સ દક્ષિણં તૂણમુખેન વામં વ્યાપારયન્હસ્તમલક્ષ્યતાજૌ ।
આકર્ણકૃષ્ટા સકૃદસ્ય યોદ્ધુર્મૌર્વીવ બાણાન્સુષુવે રિપુઘ્નાન્ ॥ ૭-૫૭॥

સ રોષદષ્ટાધિકલોહિતોષ્ઠૈર્વ્યક્તોર્ધ્વરેખા ભૃકુટીર્વહદ્ભિઃ ।
તસ્તાર ગાં ભલ્લનિકૃત્તકણ્ઠૈર્હૂંકારગર્ભૈર્દ્વિષતાં શિરોભિઃ ॥ ૭-૫૮॥

સર્વૈર્બલાઙ્ગૈર્દ્વિરદપ્રધાનૈઃ સર્વાયુધૈઃ કઙ્કટભેદિભિશ્ચ ।
સર્વપ્રયત્નેન ચ ભૂમિપાલાસ્તસ્મિન્પ્રજહ્રુર્યુધિ સર્વ એવ ॥ ૭-૫૯॥

સોऽસ્ત્રવ્રજૈશ્છન્નરથઃ પરેષાં ધ્વજાગ્રમાત્રેણ બભૂવ લક્ષ્યઃ ।
નીહારમગ્નો દિનપૂર્વભાગઃ કિંચિત્પ્રકાશેન વિવસ્વતેવ ॥ ૭-૬૦॥

પ્રિયંવદાત્પ્રાપ્તમસૌ કુમારઃ પ્રાયુઙ્ક્ત રાજસ્વધિરાજસૂનુઃ ।
ગાન્ધર્વમસ્ત્રં કુસુમાસ્ત્રકાન્તઃ પ્રસ્વાપનં સ્વપ્નનિવૃત્તલૌલ્યઃ ॥ ૭-૬૧॥

તતો ધનુષ્કર્ષણમૂઢહસ્તમેકાંસપર્યસ્તશિરસ્ત્રજાલમ્ ।
તસ્થૌ ધ્વજસ્તમ્ભનિષણ્ણદેહં નિદ્રાવિધેયં નરદેવસૈન્યમ્ ॥ ૭-૬૨॥

તતઃ પ્રિયોપાત્તરસેऽધરોષ્ઠે નિવેશ્ય દધ્મૌ જલજં કુમારઃ ।
તેન સ્વહસ્તાર્જિતમેકવીરઃ પિબન્યશો મૂર્તમિવાબભાસે ॥ ૭-૬૩॥

શઙ્ખસ્વનાભિજ્ઞતયા નિવૃત્તાસ્તં સન્નશત્રું દદૃશુઃ સ્વયોધાઃ ।
નિમીલિતાનામિવ પઙ્કજાનાં મધ્યે સ્ફુરન્તં પ્રતિમાશશાઙ્કમ્ ॥ ૭-૬૪॥

સશોણિતૈસ્તેન શિલીમુખાગ્રૈર્નિક્ષેપિતાઃ કેતુષુ પાર્થિવાનામ્ ।
યશો હૃતં સંપ્રતિ રાઘવેણ ન જીવિતં વઃ કૃપયેતિ વર્ણાઃ ॥ ૭-૬૫॥

સ ચાપકોટીનિહિતૈકબાહુઃ શિરસ્ત્રનિષ્કર્ષણભિન્નમૌલિઃ ।
લલાટબદ્ધશ્રમવારિબિન્દુર્ભીતાં પ્રિયામેત્ય વચો બભાષે ॥ ૭-૬૬॥

ઇતઃ પરાનર્ભકહાર્યશસ્ત્રાન્વૈદર્ભિ પશ્યાનુમતા મયાસિ ।
એવંવિધેનાહવચેષ્ટિતેન ત્વં પ્રાર્થ્યસે હસ્તગતા મમૈભિઃ ॥ ૭-૬૭॥

તસ્યાઃ પ્રતિદ્વન્દ્વિભવાદ્વિષાદાત્સદ્યો વિમુક્તં મુખમાબભાસે ।
નિઃશ્વાસબાષ્પાપગમાત્પ્રપન્નઃ પ્રસાદમાત્મીયમિવાત્મદર્શઃ ॥ ૭-૬૮॥

હૃષ્ટાપિ સા હ્રીવિજિતા ન સાક્ષાદ્વાગ્ભિઃ સખીનાં પ્રિયમભ્યનન્દત્ ।
સ્થલી નવામ્ભઃપૃષતાભિવૃષ્ટા મયૂરકેકાભિરિવાભ્રવૃન્દમ્ ॥ ૭-૬૯॥

ઇતિ શિરસિ સ વામં પાદમાધાય રાજ્ઞા-
મુદવહદનવદ્યાં તામવદ્યાદપેતઃ ।
રથતુરગરજોભિસ્તસ્ય રૂક્ષાલકાગ્રા
સમરવિજયલક્ષ્મીઃ સૈવ મૂર્તા બભૂવ ॥ ૭-૭૦॥

પ્રથમપરિગતાર્થસ્તં રઘુઃ સંનિવૃત્તં
વિજયિનમભિનન્દ્ય શ્લાઘ્યજાયાસમેતમ્ ।
તદુપહિતકુટુમ્બઃ શાન્તિમાર્ગોત્સુકોઽભૂ-
ન્ન હિ સતિ કુલધુર્યે સૂર્યવંશ્યા ગૃહાય ॥ ૭-૭૧॥

ઇતિ શ્રીરઘુવંશે મહાકાવ્યે કવિશ્રીકાલિદાસ-
કૃતાવજસ્વયંવરાભિગમનો નામ સપ્તમઃ સર્ગઃ ॥

Encoded and proofread by Arvind Kolhatkar akolhatkar at rogers.com

*Raghuvansha by Kalidas Chapter 7*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*